# Vaidyanatha Ashtakam

# વૈદ્યનાથાષ્ટકમ્

## Document Information

Text title : Vaidyanatha Ashtakam

File name : vaidyanaatha8.itx

Category : aShTaka, shiva

Location : doc_shiva

Author : Traditional

Transliterated by : Subramanian Ganesh sgesh at hotmail.com

Proofread by : Subramanian Ganesh sgesh at hotmail.com

Latest update : February 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 15, 2025

*sanskritdocuments.org*

# વૈદ્યનાથાષ્ટકમ્

શ્રીરામસૌમિત્રિજટાયુવેદ ષડાનનાદિત્યકુજાર્ચિતાય । (કુજાર્ચનાય)
શ્રીનીલકણ્ઠાય દયામયાય શ્રીવૈદ્યનાથાય નમઃશિવાય ॥ ૧॥
શમ્ભો મહાદેવ શમ્ભો મહાદેવ શમ્ભો મહાદેવ શમ્ભો મહાદેવ ।
શમ્ભો મહાદેવ શમ્ભો મહાદેવ શમ્ભો મહાદેવ શમ્ભો મહાદેવ ॥

ગઙ્ગાપ્રવાહેન્દુજટાધરાય ત્રિલોચનાય સ્મરકાલહન્ત્રે ।
સમસ્તદેવૈરભિપૂજિતાય શ્રીવૈદ્યનાથાય નમઃ શિવાય ॥ ૨॥
શમ્ભો મહાદેવ ....

ભક્તપ્રિયાય ત્રિપુરાન્તકાય પિનાકિને દુષ્ટહરાય નિત્યમ્ ।
પ્રત્યક્ષલીલાય મનુષ્યલોકે શ્રીવૈદ્યનાથાય નમઃ શિવાય ॥ ૩॥
શમ્ભો મહાદેવ ....

પ્રભૂતવાતાદિસમસ્તરોગપ્રણાશકર્ત્રે મુનિવન્દિતાય ।
પ્રભાકરેન્દ્વગ્નિવિલોચનાય શ્રીવૈદ્યનાથાય નમઃ શિવાય ॥ ૪॥ (ત્રિલોચનાય)

શમ્ભો મહાદેવ ....

વાક્શ્રોત્રનેત્રાઙ્ઘ્રિવિહીનજન્તોઃ વાક્શ્રોત્રનેત્રાંઘ્રિસુખપ્રદાય ।
કુષ્ઠાદિસર્વોન્નતરોગહન્ત્રે શ્રીવૈદ્યનાથાય નમઃ શિવાય ॥ ૫॥
શમ્ભો મહાદેવ ....

વેદાન્તવેદ્યાય જગન્મયાય યોગીશ્વરધ્યેય પદામ્બુજાય ।
ત્રિમૂર્તિરૂપાય સહસ્રનામ્ને શ્રીવૈદ્યનાથાય નમઃ શિવાય ॥ ૬॥
શમ્ભો મહાદેવ ....

સ્વતીર્થમૃદ્ભસ્મભૃતાઙ્ગભાજાં પિશાચદુઃખાર્તિભયાપહાય ।
આત્મસ્વરૂપાય શરીરભાજાં શ્રીવૈદ્યનાથાય નમઃ શિવાય ॥ ૭॥
શમ્ભો મહાદેવ ....

શ્રીનીલકણ્ઠાય વૃષધ્વજાય સ્રગ્ગન્ધભસ્માદ્યભિશોભિતાય ।

સુપુત્રદારાદિ સુભાગ્યદાય શ્રીવૈદ્યનાથાય નમઃ શિવાય ॥ ૮॥
શમ્ભો મહાદેવ ....

બાલામ્બિકેશ વૈદ્યેશ ભવરોગહરેતિ ચ ।
જપેન્નામત્રયં નિત્યં મહારોગનિવારણમ્ ॥ ૯॥
શમ્ભો મહાદેવ ....

॥ ઇતિ શ્રી વૈદ્યનાથાષ્ટકમ્ ॥

In some recordings, શમ્ભો મહાદેવ is
modified or replaced by મહાદેવ મહાદેવ.

Encoded by Subramanian Ganesh sgesh@hotmail.com

*Vaidyanatha Ashtakam*
pdf was typeset on February 15, 2025

Please send corrections to *sanskrit@cheerful.com*